*ते स्वीय-पितृव्यजेभ्यः कौरवेभ्यः तिरोभूताः।

विवाहसंस्कारार्थं पर्याप्तमात्रायां नारिकेलाः गुडः च सन्ति।

उत्सवार्थम् उत्सुकतया प्रतीक्षारतः अहम्।

कुटितः अपगच्छन् सः कुम्भकारः मात्रा सह सम्भाषमाणं भीमम् अपश्यत्।
कृपया किञ्चित् खाद्यं ददातु।
किन्तु इदानीमेव भोजनम् अकरोः किल, भीम?

अपिच गृहे किमपि खाद्यं नास्ति। गच्छ भ्रातृभिः सह खेल।
वराक बालक। तस्मै माता पर्याप्तं खादितुं न ददाति इति मन्ये।

हे बालक! अत्र आगच्छ।

त्वं बुभुक्षो वा?
बहु-बुभुक्षो महोदय।

मम कुटेः अन्तः गच्छ। नारिकेलान् गुडं च द्रक्ष्यसी।
नारिकेलाः गुडश्च किम्!

आम्! गच्छ यावत् आवश्यकं तावत् खाद।
कृतज्ञोऽहं महोदय!

कियत् खादितुं शक्यते? अधिकाधिकं द्वौ नारिकेलौ? वराक बालक! कियान् सुखः कृतः मया।

चिरकालात् परं यदा कुम्भकारः प्रतिगच्छन् -
किम्?
मातः किञ्चित् खाद्यं ददातु।

सः एव बालकः। नारिकेलान् न अखादत् वा? किन्तु मया दृष्टं यत् सः मत्-कुटिं प्रविष्टवान्!

अहो! अवगतम्! लज्जया मात्रम् अर्ध-नारिकेलम् अखादत्। बुभुक्षः सन्नपि सदाचारं न व्यस्मरत्।

वराक। त्रीन्
नारिकेलान् नीत्वा
तस्मै दास्यामि।

किन्तु यदा कुम्भकारः कुटेः द्वारम् उद्घाटितवान्
जडीभूतः जातः सः।
किम्?

सः..सः सर्वान्
नारिकेलान्
अखादत्..सर्वं गुडं
च।

हा हन्त!
!

किं जातम्। किमर्थं
रोदनम्!
हा हन्त!

तान् नारिकेलान् गुडं च
क्रेतुं सर्वं धनं
व्ययीकृतवान् अहम्।

मत्-पुत्रस्य विवाहार्थम्। किन्तु इदानीम्...किन्तु इदानीम्।
अहो! पुनः रोदितुम् उद्युक्तः सः!

तान् नारिकेलान् क्रेतुं धनं कुतः आगतं पितृव्य?
कुण्डान् विक्रीय

अथ इतोऽपि कुण्डान् निर्माय विक्रीणातु?
मृत्तिकातः निर्मामि। तावती मृत्तिका कुतः लभ्यते?

भीमः तत्र अगच्छत् यत्र सः पूर्वं मृत्तिकाम् एकत्रीकुर्वतः कुम्भकारान् अपश्यत्।
इयं मृत्तिका-राशिः पर्याप्ता स्यात्।

मृत्तिकायाः तत्सङ्ग्रहं गृहीत्वा

कुम्भकारम् अनयत्।
स्वीकरोतु महोदय!

पर्याप्तं वा?

सत्वरमेव सः कुम्भकारः कार्यरतः जातः।
अधुना माम् एकान्तं त्यक्त्वा गृहं गच्छ। पुनः मम कुटेः समीपं मा आगच्छ।

यदा भीमः स्व-गृहस्य अन्तः धावितवान् -
मातः! बुभुक्षः अहं! किञ्चित् ददातु - **मातः**!

किं शृणोति?
कस्यचित् क्रन्दनं श्रुतम् इति चिन्तयामि। शृणु तावत्!

आशसे यत् ब्राह्मणस्य किमपि असमीचिनं न जातम्। सः अस्मभ्यम् अनुग्रहं प्रदर्शितवान्।
कः विषयः इति अन्वेषणं करोतु मातः।

यदा कुन्तिः अन्तः गतवती -
भवते गन्तुम् अनुमतिं न दास्यामि। बालयोः आवश्यकः भवान्।
मे ददातु गन्तुम् अनुमतिम्, पितः।

मे ददातु गन्तुम् अनुमतिम्।
नैव।

कुत्र गन्तव्यम्? किमर्थं विलापनम्?

प्रायः भवत्या न ज्ञातम्, आर्ये, यत् अस्मिन् देशे बकासुर-नाम्ना राक्षसः निवसति।

अस्य नगरस्य वासिभिः प्रति-दिनम् अक्ष-भार-ओदनम् नीतव्यम्।
अक्ष-भार-ओदनम्।

ओदन-दाने सङ्कोचः नास्ति। किन्तु सः राक्षसः शकटं कर्षन्तौ महिषौ अपि खादति। अपिच..अपिच बालकमपि।
अहो!

अस्मिन् नगरे प्रति कुटुम्बं पर्यायेण शकटस्य कृते चालकस्य प्रबन्धं करोति। अद्य अस्माकं पर्यायः।
तत्-शकटम् अस्मासु केनापि चालितव्यम्।
अहम् करोमि।
नहि। अहम्।
आर्य। भवान् अस्मभ्यः कृपां प्रदर्शितवान्। भवद्गृहे स्थातुम् अनुमतिं प्रदत्तवान्। कृपया उपकारस्य प्रतिकारार्थम् अवसरं प्रददातु।
मत्पुत्राय शकटं चालयितुम् अनुमतिं प्रददातु।
नहि! कदापि न। अनुमन्तुं न शक्नोमि एव।
सः मम अतिथिः। शकटं चालयित्वा राक्षसेन खादितः भवितुम् अनुमतिं न प्रदास्यामि।
सः खादितः न भविष्यति भोः अहं आश्वासनं ददामि।
सः राक्षसेन युद्धं करिष्यति। पश्यतु कियान् बलवान् सः।
आहारमात्रेण तस्य बलं सहजमेव। सः अनुमन्तव्यः। सः एव राक्षसं शिक्षयति।

सः ब्राह्मणः अन्ततः गन्तुम् अनुमतिं प्रदत्तवान्। एवमेव भीमः प्रस्थानं कृतवान्।
तण्डुलान् अधुनेव खादामि वा अनन्तरं वा?

किं कर्तव्यमिति चिन्तयन् सः राक्षसस्य निवास-वनं प्राप्तवान्।

अकस्मादेव -
अहो! अत्र आगतवान् किम्? किमर्थं विलम्बः?
सः एव।

उच्चैः वद।
तस्य खादनात् पूर्वं हि तण्डुलान् अहमेव खादामि।

?!

कियत् धैर्यं तव यत् मम तण्डुलान् एव खादसि। अहम्...अहम्...

अहो! त्वं बहु बलवान् इति मन्यसे किम्?

प्रतीक्षां कुरु। अनेन सम्पतति।

अस्तु। समाप्तम्। अधुना राक्षसेन युद्धम्।

हाSSSSSSS

वाSSख्
किञ्चित् कालानन्तरमेव राक्षसि भीमस्य पादयो. मृत. पतितः।

पदा भीमः गृह प्रतिगतवान्
पश्यत्। प्रत्यागतवान्। स· बलवान् इति कथितं किल?
स. बहु खादति अपि इति कथित किल? दृश्यताम् अक्ष·भार-ओदनं पूर्णं खादितम्।

नसरुद्दीन होजः

पञ्च शत वर्षात् पूर्व नसरुद्दीन होज नाम्ना कश्चन आरबः आसीत्। एकदा सा वीथ्याम् अटन् आसीत्

किम किमर्थम् किंपत् धैर्य तव
हा हन्त क्षम्यताम्

भवान् अन्यः इति अमन्ये
एवं वा? न्यायाधीशं एवमेव वद आवेदनं दास्यामि

किन्तु यदा सः नरः न्यायाधीशस्य पुरतः आनीत
अहो मम मित्रं हसन अगाम

भवान् तम् अभगं ताडितवान् किम्
आ आम माननीय महोदय

एवं चेत् भवान् अर्धदण्डम् अर्पयतु अस्तु अर्धदण्डस्य मूल्यम भवत

एकं ताम्र नाणकम्।
अस्तु तस्मै अर्पयतु भवान्
किम केवलमेकं ताम्र नाणकम्

किन्तु मां निकषा धनं नास्ति। गत्वा आनयामि।
तथास्तु।

इमौ द्वौ मित्रे स्याताम्।
अस्तु।

नसरुद्दीन न्यायाध्यक्षस्य पृष्ठ अगच्छत

अस्य अर्थः दण्ड एकं ताम्र नाणकम् अस्ति किल?

अस्तु तेन नरेण अनेतव्यं नाणकं स्वीकरोतु। नूनं गच्छामि एव।

काकः कालियः
गोपनक्रीडां क्रीडाम कालिय।
अस्तु!
नून नेत्रौ मीलामि पञ्च पर्यन्तं गणयामि। गच्छथः स्वौ गोपयथ।
अपिच भोजनार्थं युवां निग्रहीष्यामि
1-2-3-4-5
अपरस्य उपान्तस्थ द्वारा निग्रहीष्यामि।

!

किं करोषि भोः?

शशौ एकान्तौ त्यज चमतक!

कीचो मीचो धावतम्!

कोटरस्य अन्तः -
चमतक· अनुधावति इति चिन्तयामि बहिः धावाव।

हा हन्त। किं करवाव?
अपरस्य उपान्तस्य द्वारा बहि· धावाव

किन्तु यदा तौ अपरम् उपान्तं प्राप्नुताम् -
तेन उपान्तः शिलया पिहित ।

आवां बद्धौ।
चिन्ता मास्तु कालिय कथञ्चित् एव आवां रक्षिष्यति।

यथार्थमेव कालियः सम्यक् प्रयत्नं कुर्वन् आसीत्।
अन्तः गन्तुम् अवसरं न दास्यामि।

यथेच्छा दंश किन्तु निर्वारयितुं न शक्नोषि।

अद्य बहु सम्यक् भोजनं लप्स्यते। हि! हि! हि!
किं करवाणि?

बब्लुः आगच्छन्। किन्तु सः दुष्टः कदापि मम वा शशयोः साहाय्यं न करिष्यति। किन्तु यदि.. यदि..

चमतक मम कृते अपि किञ्चित् मधुम् आनय!

मधुः इति अवदः? कुत्र अस्ति?
अत्र कोटरे। बहु-मात्रायाम् अस्ति। किन्तु सा शिला नोत्तव्या।

?
आवां धन्यौ ते कालिय। भीताः आस्ताम्।
युवां सुरक्षितौ।
किमपि न पश्यामि।
नहि! नहि! किमपि दृश्यते।
क्व मधुः?
मधुः?
अन्तः गत्वा सत्वरं मधुम् आनय।
किन्तु तत्र मधुः नास्ति। कृपया मयि विश्वसिहि, बब्लो।
वराकः चमतकः। घोर-समस्यायां पतितः सः नूनम्।

चतुरः राज-कुमारः - यवन-कथा

अश्वेन सह मृदुभाषणम् अकरोत्।

ततः परं पर्याणे आरोहणम् अकरोत्।

अश्वः उत्थाय आरोहकं क्षिपेत् इति सर्वे अबिभयुः।
परन्तु -
अश्वं चालयति
साधु पुत्र!

तं स्व-छाया भाययन्ती आसीत् पितः।

सूर्यं प्रति आवर्तयं यतोहि स्व-छायां न पश्येत्। तदर्थम् इयान् मृदुः जातः।
त्वयि गर्वः अस्मि, वत्स।

मासडोनियातः विशाल-राज्यं भोक्तुम् अर्हसि।
अयं बालकः अलक्षेन्द्रः आसीत्। यः चरित्रे अलक्षेण्द्रः महान् इति उच्यते। पितुः स्तुति-वचनं साकारम् अकरोत्। मृत्यु-काले प्रपञ्चस्य अर्ध-भागस्य स्वामी आसीत्। तस्य अश्वस्य नाम बुसिफालुस्। अलक्षेन्द्रः सदा तम् आरोह्य एव युद्धम् अकरोत्।